শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ত্রিচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রিচৎৱারিংশঃ সর্গঃ ॥

## উত্তরদিগ্ৱর্তীনি স্থানানি পরিচাযযতা সুগ্রীৱেণ শতবলিপ্রভৃতীনাং তত্র প্রেষণম্

ততঃ সন্দিশ্য সুগ্রীৱঃ শ্ৱশুরং পশ্চিমাং দিশম্।
ৱীরং শতবলিং নাম ৱানরং ৱানরেশ্ৱরঃ ॥ **4.43.1** ॥

উৱাচ রাজা সর্ৱজ্ঞঃ সর্ৱৱানরসত্তমঃ।
ৱাক্যমাত্মহিতং চৈৱ রামস্য চ হিতং তদা ॥ **4.43.2** ॥

ৱৃতঃ শতসহস্রেণ ৎৱদ্ৱিধানাং ৱনৌকসাম্।
ৱৈৱস্ৱতসুতৈঃ সার্ধং প্রৱিষ্টঃ সর্ৱমন্ত্রিভিঃ ॥ **4.43.3** ॥

দিশং হ্যুদীচীং ৱিক্রান্তাং হিমশৈলাৱতংসিকাম্।
সর্ৱতঃ পরিমার্গধ্ৱং রামপত্নীং যশস্ৱিনীম্ ॥ **4.43.4** ॥

অস্মিন্ কার্যে ৱিনির্ৱৃত্তে কৃতে দাশরথেঃ প্রিযে।
ঋণান্মুক্তা ভৱিষ্যামঃ কৃতার্থার্থৱিদাং ৱরাঃ ॥ **4.43.5** ॥

কৃতং হি প্রিযমস্মাকং রাঘৱেণ মহাত্মনা।
তস্য চেৎপ্রতিকারোঽস্তি সফলং জীৱিতং ভৱেৎ ॥ **4.43.6** ॥

অর্থিনঃ কার্যনির্ৱৃত্তিমকর্তুরপি যশ্চরেৎ।
তস্য স্যাৎ সফলং জন্ম কিং পুনঃ পূর্ৱকারিণঃ ॥ **4.43.7** ॥

এতাং বুদ্ধিং সমাস্থায দৃশ্যতে জানকী যথা।
তথা ভৱদ্ভিঃ কর্তৱ্যমস্মৎপ্রিযহিতৈষিভিঃ॥ **4.43.8**॥

অযং হি সর্ৱভূতানাং মান্যস্তু নরসত্তমঃ।
অস্মাসু চ গতঃ প্রীতিং রামঃ পরপুরঞ্জযঃ॥ **4.43.9**॥

ইমানি বহুদুর্গাণি নদ্যঃ শৈলান্তরাণি চ।
ভৱন্তঃ পরিমার্গন্তু বুদ্ধিৱিক্রমসম্পদা॥ **4.43.10**॥

তত্র ম্লেচ্ছান্ পুলিন্দাংশ্চ শূরসেনাংস্তথৈৱ চ।
প্রস্থলান্ ভরতাংশ্চৈৱ কুরূংশ্চ সহ মদ্রকৈঃ॥ **4.43.11**॥

কাম্বোজযৱনাংশ্চৈৱ শকানাং পত্তনানি চ।
অন্ৱীক্ষ্য দরদাংশ্চৈৱ হিমৱন্তং ৱিচিন্ৱথ॥ **4.43.12**॥

লোধ্রপদ্মকখণ্ডেষু দেৱদারুৱনেষু চ।
রাৱণঃ সহ ৱৈদেহ্যা মার্গিতৱ্যস্ততস্ততঃ॥ **4.43.13**॥

ততঃ সোমাশ্রমং গৎৱা দেৱগন্ধর্ৱসেৱিতম্।
কালং নাম মহাসানুং পর্ৱতং তং গমিষ্যথ॥ **4.43.14**॥

মহৎসু তস্য শৈলেষু পর্ৱতেষু গুহাসু চ।
ৱিচিন্ৱত মহাভাগাং রামপত্নীমনিন্দিতাম্॥ **4.43.15**॥

তমতিক্রম্য শৈলেন্দ্রং হেমগর্ভং মহাগিরিম্।
ততঃ সুদর্শনং নাম পর্ৱতং গন্তুমর্হথ॥ **4.43.16**॥

ততো দেৱসখো নাম পর্ৱতঃ পতগালযঃ।
নানাপক্ষিসমাকীর্ণো ৱিৱিধদ্রুমভূষিতঃ॥ **4.43.17**॥

তস্য কাননখণ্ডেষু নির্ঝরেষু গুহাসু চ।
রাৱণঃ সহ ৱৈদেহ্যা মার্গিতৱ্যস্ততস্ততঃ॥ **4.43.18**॥

তমতিক্রম্য চাকাশং সর্ৱতঃ শতযোজনম্।
অপর্ৱতনদীৱৃক্ষং সর্ৱসত্ত্ৱৱিৱর্জিতম্॥ **4.43.19** ॥

তত্তু শীঘ্রমতিক্রম্য কান্তারং রোমহর্ষণম্।
কৈলাসং পাণ্ডুরং প্রাপ্য হৃষ্টা যূযং ভৱিষ্যথ॥ **4.43.20** ॥

তত্র পাণ্ডুরমেঘাভং জাম্বূনদপরিষ্কৃতম্।
কুবেরভৱনং রম্যং নির্মিতং ৱিশ্ৱকর্মণা॥ **4.43.21** ॥

ৱিশালা নলিনী যত্র প্রভূতকমলোৎপলা।
হংসকারণ্ডৱাকীর্ণা অপ্সরোগণসেৱিতা॥ **4.43.22** ॥

তত্র ৱৈশ্রৱণো রাজা সর্ৱলোকনমস্কৃতঃ।
ধনদো রমতে শ্রীমান্ গুহ্যকৈঃ সহ যক্ষরাট্॥ **4.43.23** ॥

তস্য চন্দ্রনিকাশেষু পর্ৱতেষু গুহাসু চ।
রাৱণঃ সহ ৱৈদেহ্যা মার্গিতৱ্যস্ততস্ততঃ॥ **4.43.24** ॥

ক্রৌঞ্চং তু গিরিমাসাদ্য বিলং তস্য সুদুর্গমম্।
অপ্রমত্তৈঃ প্রৱেষ্টৱ্যং দুষ্প্রৱেশং হি তৎ স্মৃতম্॥ **4.43.25** ॥

ৱসন্তি হি মহাত্মানস্তত্র সূর্যসমপ্রভাঃ।
দেৱৈরভ্যর্থিতাঃ সম্যগ্ দেৱরূপা মহর্ষযঃ॥ **4.43.26** ॥

ক্রৌঞ্চস্য তু গুহাশ্চান্যাঃ সানূনি শিখরাণি চ।
নির্দরাশ্চ নিতম্বাশ্চ ৱিচেতৱ্যাস্ততস্ততঃ॥ **4.43.27** ॥

অৱৃক্ষং কামশৈলং চ মানসং ৱিহগালযম্।
ন গতিস্তত্র ভূতানাং দেৱানাং ন চ রক্ষসাম্॥ **4.43.28** ॥

স চ সর্ৱৈর্ৱিচেতৱ্যঃ সসানুপ্রস্থভূধরঃ।
ক্রৌঞ্চং গিরিমতিক্রম্য মৈনাকো নাম পর্ৱতঃ॥ **4.43.29** ॥

মযস্য ভৱনং তত্র দানৱস্য স্বযঙ্কৃতম্।
মৈনাকস্তু ৱিচেতৱ্যঃ সসানুপ্রস্থকন্দরঃ॥ **4.43.30**॥

স্ত্রীণামশ্ৱমুখীনাং তু নিকেতস্তত্র তত্র তু।
তং দেশং সমতিক্রম্য আশ্রমং সিদ্ধসেৱিতম্॥ **4.43.31**॥

সিদ্ধা ৱৈখানসা যত্র ৱালখিল্যাশ্চ তাপসাঃ।
ৱন্দিতৱ্যাস্ততঃ সিদ্ধাস্তপসা ৱীতকল্মষাঃ॥ **4.43.32**॥

প্রষ্টৱ্যা চাপি সীতাযাঃ প্রৱৃত্তির্ৱিনযান্ৱিতৈঃ।
হেমপুষ্করসঞ্ছন্নং তত্র ৱৈখানসং সরঃ॥ **4.43.33**॥

তরুণাদিত্যসঙ্কাশৈর্হংসৈর্ৱিচরিতং শুভৈঃ।
ঔপৱাহ্যঃ কুবেরস্য সার্ৱভৌম ইতি স্মৃতঃ॥ **4.43.34**॥

গজঃ পর্যেতি তং দেশং সদা সহ করেণুভিঃ।
তৎ সরঃ সমতিক্রম্য নষ্টচন্দ্রদিৱাকরম্।
অনক্ষত্রগণং ৱ্যোম নিষ্পযোদমনাদিতম্॥ **4.43.35**॥

গভস্তিভিরিৱার্কস্য স তু দেশঃ প্রকাশ্যতে।
ৱিশ্রাম্যদ্ভিস্তপঃ সিদ্ধৈর্দেৱকল্পৈঃ স্ৱযম্প্রভৈঃ॥ **4.43.36**॥

তং তু দেশমতিক্রম্য শৈলোদা নাম নিম্নগা।
উভযোস্তীরযোস্তস্যাঃ কীচকা নাম বেণৱঃ॥ **4.43.37**॥

তে নযন্তি পরং তীরং সিদ্ধান্ প্রত্যানযন্তি চ।
উত্তরাঃ কুরৱস্তত্র কৃতপুণ্যপ্রতিশ্রযাঃ॥ **4.43.38**॥

ততঃ কাঞ্চনপদ্মাভিঃ পদ্মিনীভিঃ কৃতোদকাঃ।
নীলৱৈদূর্যপত্রাঢ্যা নদ্যস্তত্র সহস্রশঃ॥ **4.43.39**॥

রক্তোৎপলৱনৈশ্চাত্র মণ্ডিতাশ্চ হিরণ্ময়ৈঃ।
তরুণাদিত্যসঙ্কাশা ভান্তি তত্র জলাশযাঃ॥ **4.43.40** ॥

মহার্হমণিপত্রৈশ্চ কাঞ্চনপ্রভকেসরৈঃ।
নীলোৎপলৱনৈশ্চিত্রৈঃ স দেশঃ সর্ৱতো ৱৃতঃ॥ **4.43.41** ॥

নিস্তুলাভিশ্চ মুক্তাভির্মণিভিশ্চ মহাধনৈঃ।
উদ্ধূতপুলিনাস্তত্র জাতরূপৈশ্চ নিম্নগাঃ॥ **4.43.42** ॥

সর্ৱরত্নময়ৈশ্চিত্রৈরৱগাঢা নগোত্তমৈঃ।
জাতরূপময়ৈশ্চাপি হুতাশনসমপ্রভৈঃ॥ **4.43.43** ॥

নিত্যপুষ্পফলাস্তত্র নগাঃ পত্ররথাকুলাঃ।
দিৱ্যগন্ধরসস্পর্শাঃ সর্ৱকামান্ স্রৱন্তি চ॥ **4.43.44** ॥

নানাকারাণি ৱাসাংসি ফলন্ত্যন্যে নগোত্তমাঃ।
মুক্তাৱৈদূর্যচিত্রাণি ভূষণানি তথৈৱ চ।
স্ত্রীণাং যান্যনুরূপাণি পুরুষাণাং তথৈৱ চ॥ **4.43.45** ॥

সর্ৱর্তুসুখসেৱ্যানি ফলন্ত্যন্যে নগোত্তমাঃ।
মহার্হমণিচিত্রাণি ফলন্ত্যন্যে নগোত্তমাঃ॥ **4.43.46** ॥

শযনানি প্রসূযন্তে চিত্রাস্তরণৱন্তি চ।
মনঃকান্তানি মাল্যানি ফলন্ত্যত্রাপরে দ্রুমাঃ॥ **4.43.47** ॥

পানানি চ মহার্হাণি ভক্ষ্যাণি ৱিৱিধানি চ।
স্ত্রিযশ্চ গুণসম্পন্না রূপযৌৱনলক্ষিতাঃ॥ **4.43.48** ॥

গন্ধর্ৱাঃ কিন্নরাঃ সিদ্ধা নাগা ৱিদ্যাধরাস্তথা।
রমন্তে সততং তত্র নারীভির্ভাস্বরপ্রভাঃ॥ **4.43.49** ॥

সর্ৱে সুকৃতকর্মাণঃ সর্ৱে রতিপরাযণাঃ।
সর্ৱে কামার্থসহিতা ৱসন্তি সহ যোষিতঃ॥ **4.43.50**॥

গীতৱাদিত্রনির্ঘোষঃ সোৎকৃষ্টহসিতস্ৱনঃ।
শ্রূযতে সততং তত্র সর্ৱভূতমনোরমঃ॥ **4.43.51**॥

তত্র নামুদিতঃ কশ্চিন্নাত্র কশ্চিদসৎপ্রিযঃ।
অহন্যহনি ৱর্ধন্তে গুণাস্তত্র মনোরমাঃ॥ **4.43.52**॥

সমতিক্রম্য তং দেশমুত্তরঃ পযসাং নিধিঃ।
তত্র সোমগিরির্নাম মধ্যে হেমমযো মহান্॥ **4.43.53**॥

ইন্দ্রলোকগতা যে চ ব্রহ্মলোকগতাশ্চ যে।
দেৱাস্তং সমৱেক্ষন্তে গিরিরাজং দিৱং গতাঃ॥ **4.43.54**॥

স তু দেশো ৱিসূর্যোঽপি তস্য ভাসা প্রকাশতে।
সূর্যলক্ষ্ম্যাভিৱিজ্ঞেযস্তপতেৱ ৱিৱস্ৱতা॥ **4.43.55**॥

ভগৱাংস্তত্র ৱিশ্ৱাত্মা শম্ভুরেকাদশাত্মকঃ।
ব্রহ্মা ৱসতি দেৱেশো ব্রহ্মর্ষিপরিৱারিতঃ॥ **4.43.56**॥

ন কথঞ্চন গন্তৱ্যং কুরূণামুত্তরেণ ৱঃ।
অন্যেষামপি ভূতানাং নানুক্রামতি ৱৈ গতিঃ॥ **4.43.57**॥

স হি সোমগিরির্নাম দেৱানামপি দুর্গমঃ।
তমালোক্য ততঃ ক্ষিপ্রমুপাৱর্তিতুমর্হথ॥ **4.43.58**॥

এতাৱদ্ ৱানরৈঃ শক্যং গন্তুং ৱানরপুঙ্গৱাঃ।
অভাস্করমমর্যাদং ন জানীমস্ততঃ পরম্॥ **4.43.59**॥

সর্ৱমেতদ্ ৱিচেতৱ্যং যন্মযা পরিকীর্তিতম্।
যদন্যদপি নোক্তং চ তত্রাপি ক্রিযতাং মতিঃ॥ **4.43.60**॥

ততঃ কৃতং দাশরথের্মহৎপ্রিযং
মহৎপ্রিযং চাপি ততো মম প্রিযম্।
কৃতং ভৱিষ্যত্যনিলানলোপমা
ৱিদেহজাদর্শনজেন কর্মণা॥ **4.43.61** ॥

ততঃ কৃতার্থাঃ সহিতাঃ সবান্ধৱা
মযার্চিতাঃ সর্ৱগুণৈর্মনোরমৈঃ।
চরিষ্যথোর্ৱীং প্রতি শান্তশত্রৱঃ
সহপ্রিযা ভূতধরাঃ প্লৱঙ্গমাঃ॥ **4.43.62** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ত্রিচৎৱারিংশঃ সর্গঃ ॥